## पङ्गोश्च । (६८/५२३)

पङ्गुशब्दात् स्त्रियाम् ऊङ् प्रत्ययो भवति । पङ्गूः ।

[३७०] श्वशुरस्योकाराकारलोपश्च वक्तव्यः ।

श्वश्रूः ॥

## ऊरूत्तरपदादौपम्ये । (६९/५२४)

ऊरूत्तरपदात् प्रातिपदिकात् औपम्ये गम्यमाने स्त्रियाम् ऊङ् प्रत्ययो भवति । कदलीस्तम्भोरूः । नागनासोरूः । करभोरूः । औपम्ये इति किम्? [1]वृत्तोरुः स्त्री ॥

## संहितशफलक्षणवामादेश्च । (७०/५२५)

संहित शफ लक्षण [2]वाम इत्येवमादेः प्रातिपदिकाद् ऊरूत्तरपदात् स्त्रियामूङ् प्रत्ययो भवति । अनौपम्यार्थ आरम्भः । संहितोरूः । [3]शफोरूः । लक्षणोरूः । वामोरूः ।

[३७१] सहितसहाभ्यां चेति वक्तव्यम् । (म. भा. २. २२७)

सहितोरूः । सहोरूः ॥

## कद्रुकमण्डल्वोश्छन्दसि । (७१/३४४९)

कद्रुशब्दात् कमण्डलुशब्दाच् च छन्दसि विषये [4]स्त्रियाम् ऊङ् प्रत्ययो भवति । 'कद्रूश्च वै सुपर्णी च' (तै. सं. ६.१.६) । मा स्म कमण्डलूं शूद्राय दद्यात् । छन्दसि इति किम्? कद्रुः । कमण्डलुः (म. भा. २.२२७) ।

[३७२] गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् । (म. भा. २. २२७)

'गुग्गुलूः' (अ. ४.३७.३) । 'मधूः' (अ. ७. ५६. २) । 'जतूः' (मै. ३. १४. ६) । 'पतयालूः' (अ. ७. ११५.२) ॥

## सञ्ज्ञायाम् । (७२/५२६)

कद्रुकमण्डलुशब्दाभ्यां सञ्ज्ञायां विषये स्त्रियाम् ऊङ् प्रत्ययो भवति । अच्छन्दोर्थं वचनम् । कद्रूः । कमण्डलूः । [5]सञ्ज्ञायाम् इति किम् ? कद्रुः । कमण्डलुः ॥

---

1. वृत्तोरूः फ. 2. वाम नास्ति फ. 3. शफोरूः नास्ति ब. 4. स्त्रियाम् नास्ति फ. 5. वाक्यमिदं नास्ति ड..फ.